Postal Regd.No. GAMC- 1553/2019-2021 ISSN 2454-6313

# संस्कृत-साम्प्रतम्

(Sampratam means "Current")

(संस्कृतमासिकीपत्रिका)
वर्ष : १५ अङ्क : १७९
ॲप्रिल - २०२१

EKLAVYA SANSKRIT ACADEMY

Registered under RNI No. GUJMUL/2006/17235. Published on 5th of every month. Permitted to post at Ahmedabad PSO on 7th of every month under Postal Regd.No. GAMC- 1553/2019-2021 issued by SSP Ahmedabad. Valid upto 31-12-2021. containing 8 pages ₹10

## चिन्तनम्

सतीशः गज्जर्

### हस्तधारणम्

अनेके सज्जनाः मया दृष्टाः । ते काञ्चित् सामाजिकीं संस्थाम् आश्रित्य स्वीयं जीवनं सश्रद्धं विभूषयन्ति । संस्थापरायणानां तेषां तत्र न भविष्यस्य किमपि चिन्तनम्, न च भूतकालस्य कोऽपि इतिहासः । केवले वर्तमानकालिके जीवने परितोषः । तेषु केचन निर्धनाः सेवकाः अतीते काले मध्येमार्गं संस्थां त्यक्त्वा अन्यत्र नूतनतया उद्योगं प्रारब्धुम् अपि साहसं न कुर्वन्ति । एवं स्थिते कदाचित् स्वल्पेन आयेन उदरपूर्तिं कुर्वतः कस्यचित् आर्थिकं सङ्कटं भृशं पीडयति । तदा उत्तमाः संस्थाः हस्तं लम्बयन्ति । (तस्य साहाय्यं कुर्वन्ति ।) परन्तु एषा घटना दुर्लभा एव । सः सेवकः अन्ते अगतिकतया तां संस्थां त्यजति । ततः तस्य आर्थिकं सङ्कटं प्रतिक्षणं वर्धते । पूर्वं सञ्चितस्य धनस्य व्ययः, नूतनस्य आयस्य अप्राप्तिः च शोकं गाढतरं करोति । एतादृशे काले कश्चित् स्निग्धः सुहृत् स्कन्धे हस्तं संस्थाप्य आश्वासयति – 'मित्र ! चिन्ता मास्तु, अहम् अस्मि ।' अनेन वाक्येन चमत्कारः जायते । दुर्गतस्य मनुष्यस्य उत्साहः वर्धते । सः पुनः उद्योगं लभते । पुनश्च अर्थतन्त्रं नूतनं स्पन्दनं प्राप्नोति । आश्वासनं च चिरं जीवति ।

मनुष्यस्य दीर्घे जीवनकाले एषा घटना दुर्लभा नास्ति । यः मनुष्यः मित्रस्य एतादृशं वाक्यं कदापि न श्रुतवान् सः वस्तुतः भाग्यहीनः अस्ति । एषा घटना खलु 'सङ्कटे मित्रपरीक्षा' सूक्तेः साक्षात्कारः अस्ति ।

मम अपि जीवनस्य द्वित्राः मासाः वृत्तिहीनाः अभवन् । तदा कश्चित् सुहृद् दूरवाण्या उपरितनम् इव किमपि गभीरस्वरेण उक्तवान् – 'लक्षरूप्यकाणाम् आवश्यकता चेदपि निःसङ्कोचं वदतु भवान् ।'

वस्तुतः आपत्तिः मनुष्यजीवनस्य कश्चित् भागः इव प्रतिभाति । तत्र केवलं हस्तधारणं कर्तुं कश्चित् आत्मीयः सहायवान् अपेक्ष्यते । वटवृक्षभूता संस्था तत् कर्तुं न शक्नोति चेत् तस्याः प्रतिष्ठा एरण्डात् अपि अवकृष्टा अस्ति । या संस्था सम्यक् जलसेचनं कर्तुं न शक्नोति, तस्याः नूतनस्य बीजस्य रोपणे अधिकारः नास्ति । प्रत्येकं मनुष्यः स्वीयं हृदयं पूर्णतः समर्प्य कर्मनिष्ठः सन् प्रविशति । परन्तु निर्गमने सः किमर्थं भिन्नः इव भवति ? संस्थायाः अधिकारिभिः चिन्तनीयम् – सर्वासु अवस्थासु रुग्णस्य एव दोषः न भवति, कदाचित् वैद्याः अपि शङ्कनीयाः खलु !

# कथम् ईश्वरेण मिलेयम् ?

व्योम शाहः



पुरा भारतदेशे कश्चित् नृपः राज्यं करोति स्म । सः कुशलः पटुः च आसीत् । तस्य प्रासादस्य वामतः काचित् विपणी आसीत् । तस्यां विपण्यां सर्वेऽपि आनन्दिताः सन्तुष्टाः च आसन् । विपण्यां सर्वेषां वणिजां वाणिज्यं सम्यक् प्रचलति स्म । आपणिकाः यथामूल्यं धान्यं विक्रीणते स्म क्रेतारः च यथामूल्यम् आनन्देन क्रीणन्ति स्म । प्रजाः अपि सुखेन जीवनं यापयन्ति स्म ।

अथ कदाचित् सायंकाले नृपः तस्य प्रकोष्ठे आसीत् । सः वातायनात् बहिः अपश्यत् । विपण्यां सर्वान् अपि आपणिकान् क्रेतॄन् च सुखिनः दृष्ट्वा तस्य महान् सन्तोषः जातः । तदानीमेव सः विपण्यां कञ्चित् सन्न्यासिनम् अपश्यत् । संसारात् विरक्तः सः सन्न्यासी मोदेन विपण्यां भ्रमन् आसीत् । कस्मिंश्चिदपि वस्तुनि तस्य स्पृहा वा रागः वा द्वेषः वा न दृश्यते स्म । निजानन्दे रममाणं तं सन्न्यासिनं दृष्ट्वा वैराग्ययुक्तेन तेन सन्न्यासिना मेलितुं राज्ञः तीव्रा इच्छा जाता । सन्न्यासिना मेलितुं व्याकूलः सः सैनिकान् आहूय उक्तवान् – "भोः सैनिकाः ! शीघ्रं विपणीं गच्छन्तु । तत्र कश्चित् सन्न्यासी भ्रमति । भवन्तः इदानीम् एव तं सन्न्यासिनम् अत्र आनयन्तु । अहं तेन मेलितुं व्याकूलः अस्मि ।"

राज्ञः एतादृशं वचनं श्रुत्वा सैनिकाः व्यचारयन् – 'एतं सन्न्यासिनं वयं कथं शीघ्रतया अत्र आनयामः ? यदि वयं विपणीं गमिष्यामः तर्हि बहु विलम्बः भविष्यति । तेन राजा कुपितो भविष्यति ।' ततः ते निर्णयं कृतवन्तः यत् इतः एव रज्जुम् अधः क्षिप्त्वा तं सन्न्यासिनं रज्जवा बद्ध्वा, रज्जुम् आकृष्य अत्र आनयामः । एवं निर्णयं कृत्वा ते सैनिकाः कथञ्चित् तं सन्न्यासिनं तत्र नृपस्य प्रकोष्ठम् आनीतवन्तः ।

अनेन प्रकारेण आनीतं सन्न्यासिनं दृष्ट्वा प्रथमं तु नृपः सन्न्यासिनं प्रति क्षमाम् अयाचत । सन्न्यासी अपि सस्मितं नृपम् अक्षाम्यत् । व्याकूलः नृपतिः बालः इव उत्साहेन तं सन्न्यासिनम् अवदत् – "महात्मन् ! भवान् अस्मात् संसारात् विरक्तः अस्ति । मम मनसि कश्चित् प्रश्नः उद्भूतः वर्तते । एतस्य प्रश्नस्य उत्तरं प्राप्तुम् अहं बहु प्रयत्नं कृतवान् किन्तु उत्तरं न प्राप्तवान् । मम प्रश्नस्य उत्तरं प्रदातुं भवान् एव समर्थः इति अहं चिन्तयामि ।"

राज्ञः एतादृशं वचनं श्रुत्वा – "निश्चयेन पृच्छतु राजन् ! प्रश्नः निश्चयेन गूढः एव स्यात् अतः एव अत्र

अहम् एवम्प्रकारेण रज्जवा बद्ध्वा आहूतः इति अहं मन्ये।" इति प्रत्यवदत् सन्न्यासी।

"महात्मन्! अस्मिन् जन्मनि वयं कथं झटिति ईश्वरेण मेलितुं समर्थाः भवेम ? कृपया अस्मिन् विषये मां प्रबोधयतु भवान्।" इति पृष्टवान् नृपः।

सन्न्यासी सस्मितम् अवदत् – "शृणोतु राजन्! भवतः प्रश्नस्य उत्तरं भवतः पार्श्वे एव वर्तते। किन्तु तस्य उत्तरस्य प्राप्त्यै प्रयत्नः अपेक्षितः। भवता इदानीं यावत् पुरुषार्थः एव न कृतः। अतः भवादृशः पटुः अपि अस्य प्रश्नस्य निवारणं कर्तुं न शक्नोति।"

"शृणोतु ध्यानपूर्वकं, यदि भवता मेलितुं मम अत्र आगमनस्य इच्छा अभविष्यत् तर्हि मम मार्गे कदाचित् बहवः विघ्नाः उत्पन्नाः अभविष्यन्। भवता मेलितुं प्रथमं तु मया सेवकः सूचनीयः अनन्तरं सः सेवकः भवन्तं सूचयेत्। यदि भवतः इच्छा अवकाशः आनुकूल्यं च वर्तन्ते तर्हि एव भवान् मेलितुं माम् आह्वयति। यदि अहं भवता मेलितुम् इच्छामि तर्हि एषा एव प्रक्रिया खलु ? किन्तु यदि भवान् मया मेलितुम् इच्छति तर्हि ? भवतः कृते तु अतीव सरलम् अस्ति। यथा अद्य मया मेलितुं भवतः इच्छा जाता भवान् मां तत्क्षणम् आहूतवान्। भवान् नृपः मम स्वामी च। अतः अहमपि अत्र उपस्थितः। प्रायः सर्वे आमन्त्रिताः भवन्ति। केचन मादृशाः रज्जवा आनीताः। अवगतं वा नृपते ?" इति उत्तरं दत्त्वा सन्न्यासी मन्दम् अहसत्।

सन्न्यासिनः वचनं श्रुत्वा – "शनैः शनैः अवगच्छन् अस्मि। किन्तु महात्मन्! परमेश्वरः मया मेलितुं किमर्थम् आगमिष्यति ?" इति राजा पुनः अपृच्छत्।

राज्ञः प्रश्नं श्रुत्वा – "मया मेलितुं भवतः इच्छा कथं जाता ?" इति पृष्टवान् सन्न्यासी।

"यदा अहं भवन्तं विपण्यां निःसङ्गं भ्रमन्तम् अपश्यं तदैव भवतः वैराग्येण अहं प्रभावितः। एतदेव कारणं यत् भवता मेलितुं मम इच्छा जाता।"

नृपस्य एतादृशं वचनं श्रुत्वा मन्दं स्मयमानः सन्न्यासी अवदत् – "एषः एव मार्गः ईश्वरेण मेलितुम्। भवान् अपि स्वकर्तव्यानि कुर्वन् तेषु स्पृहां ममत्वं च त्यक्त्वा परमेश्वरस्य भक्तिं करोतु। फलस्य कृते स्पृहां त्यक्त्वा भवान् स्वकर्तव्यं निर्वहन् भगवतः भक्तिम् अर्चनां च करोतु। परमेश्वरः निश्चयेन भवता मेलितुम् आगमिष्यति। मेलनाय आह्वयिष्यति वा।" इति अवदत् सन्न्यासी।

सन्न्यासिनः उपदेशं श्रुत्वा सर्वम् अवगत्य नृपः सन्न्यासिनं प्राणमत्। सन्न्यासी तस्मै नृपाय आशिषं प्रदाय निर्गतः। तदाराभ्य राजा वैरागी भूत्वा ममत्वं त्यक्त्वा निस्वार्थं राज्यं पालयन् ईश्वरस्य भक्तिम् अकरोत्।

विपणी–Market, आपणिकः – Shopkeeper

# क्रिकेट्-क्रीडा

डॉ. सुखेश्वरः झा

(अनुवर्तते...)

अत्रेदम् अवधेयं विकास-शीलस्य भारत-सदृशस्य देशस्य अस्यां क्रीडायाम् एतावान् आग्रहः विचारणीयः। अस्याः प्रेक्षणेन जनाः परमाह्लादिताः भवन्ति इति मनो-विनोदनानुकूलः अस्याः क्रीडा-गुणः नूनम् अस्याः शुक्लः पक्षः। परन्तु अनेक-दिन-व्यापिनी मुख्यकार्यस्य प्रचुरं समयमियं विनाशयति इति अस्याः कृष्णः पक्षः। किञ्च-स्वर्ण-मुद्राम् उच्छात्य पाल्याः निर्धारण-पूर्वकम् अत्यधिक-व्ययेन निर्मिते क्रीडाङ्गणे महार्घ-शय्याम् आस्तीर्य बहु-मुद्रा-क्रीताभिः सामग्रीभिः अस्याः प्रयोगात् शते पञ्च-नवति-प्रायाणां सामान्यजनानां दृष्ट्या अस्याः व्यवहारिकता अपाकृता भवति। ध्रुवं कला-विज्ञान-वाणिज्य-क्षेत्रेषु अतिक्लेश-करेण चिर-तपसा प्रतिभाशालिभिः लब्धो विलक्षणो बोधः एव समस्त-मानव-हिताय विविधैः अन्वेषणाविष्कारैः मानव-विकास-चक्रम् अग्रे सारयति। मानवताम् उत्कर्षति। सर्वे मानवाः सुनीलगावस्कराः कपिलदेवाः वा सन्तोऽपि नहि भोज्य-पेय-परिधेय-भैषज्य-पोषकपदार्थ-विधान-सन्दर्भे सदाचार-शिक्षण-सन्दर्भे वा तिलप्रमाणमपि नूतनं किमपि योजयितुमीशाः। अतः चिरतपोलभ्य-विद्याध्ययनविधौ अलब्ध-साफल्या अपि कतिचन क्रिकेट-क्रीडकाः दैवात् क्वचन क्रिकेट-प्रतियोगितायां शतकं शतके, शतकानि वा निर्माय विश्व-प्रसिद्ध्या सह क्षणेन यल्लक्षाणि लभन्ते तन्न सन्तुलितम्। विश्व-विद्यालयस्तरेऽपि लब्धप्राथम्याः दर्शित-प्रतिभाप्रमाणाः भविष्णवः राष्ट्र-नायकानां विशिष्टम् अभिनन्दनं प्राप्नुवन्ति इति वृत्तपत्रात् नावगम्यते। किन्तु क्रिकेट-क्रीडकाः किमपि विशिष्टं कुर्वन्तः झटिति राष्ट्रपतेः आरभ्य सर्वैः अवश्यम् अभिनन्द्यन्ते इत्येषः गड्डुलिकाप्रवाहः भव्यानाम् अध्ययनतपसः उच्चाटकत्वात् राष्ट्रस्य अतिशयेन हानिकरः।

संक्षेपतः - अष्टादशस्य खृष्टशतकस्य मध्यकाले अस्याः प्रारम्भः। इयञ्च साम्राज्यशालिनाम् आङ्गल-जनानां क्रीडा, तैरेव स्वकीये पृथ्वीविस्तीर्णेऽधिकारक्षेत्रेऽनेकेषु देशेषु प्रचालिता। न केवलमियं जन-साधारणस्य कृते अपितु दीर्घ-काल-क्षेप-दृष्ट्या श्रीमतां कृतेऽपि नानुकूला। प्रायः तस्माद् एव हेतोः रूसामरीकादि समृद्धि-शालिनो देशाः नैनां प्रचालयन्ति, विश्व-क्रीडा-ऽऽयोजनेषु च अनुपयुक्तत्वात् नैषा अन्तर्भाव्यते। अति-पूर्वकालवत् शनौ अपराह्णे, अवकाशदिनेष्वेव वा यदि क्रीड्यते तदा न तावती हानिः।

क्रीडाः सर्वाः रम्याः भवन्ति। इयमपि रमणीया इति नानुचितम्। किन्तु मनो-विनोदनेन सह व्यायाम-फल-लाभः लघुनैव कालेन विनैव अल्पेनैव वा व्ययेन उपयुक्ते सायाह्ने प्रयुज्यमानाभिः कबड्डी-पादकन्दुक-हस्तकन्दुकादि-क्रीडाभिः सर्वेषां क्रीडकानां सहैव यथा भवति न तथा अनया क्रीडयेति निःसन्दिग्धम्। या च भारतेऽस्याः अतिशय-लोकप्रियता न खलु सा विवेकविभूषिता। अतः विशेषतो विकासशीले ग्रामीण-निश्छल-संस्कृति-सम्पन्न-जन-बहुले अतिश्रम-लब्धस्वल्प-शुक्ल-धनो-पजीविनि भारते अधिकारिभिः अस्याः क्रीडायाः प्रोत्साहने अभिनन्दने च सन्तुलनम् अवश्यं संरक्षणीयम् इति।

## मासवार्ता

### सम्पन्नः छन्दःपरिचयवर्गः



संस्कृतछन्दसाम् अध्ययनं कर्तुम् इच्छुकानां संस्कृत-अध्येतॄणां कृते एकलव्य-संस्कृत-एकेडेमीसंस्थाने 'छन्दःपरिचयः' इति अभ्यासक्रमस्य आयोजनम् अभवत् । अभ्यासक्रमोऽयं फरवरीमासस्य १२ दिनाङ्कात् आरभ्य मार्चमासस्य १३ दिनाङ्कं यावत् सप्ताहे दिनद्वयं प्राचलत् । अभ्यासक्रमेऽस्मिन् २१ छात्राः छन्दसाम् अध्ययनम् अकुर्वन् । श्रीश्यामः पटेलः छात्रेभ्यः मार्गदर्शनम् अददात् ।

### सम्पन्नः स्तोत्रपाठवर्गः

संस्कृतभाषायां निहितानि स्तोत्राणि पठितुम् इच्छुकानां संस्कृतरसिकानां कृते एकलव्य-संस्कृत-एकेडेमीसंस्थानेन स्तोत्रपाठवर्गस्य आयोजनं कृतमासीत् । अभ्यासक्रमोऽयं मार्चमासस्य २३ दिनाङ्के सम्पन्नः । अभ्यासक्रमेऽस्मिन् निश्चितस्तोत्राणि तद्यथा गणेशाथर्वशीर्षम्, सङ्कटनाशकगणेशस्तोत्रम्, द्वादशज्योतिर्लिङ्गस्तोत्रम्, शिवताण्डवस्तोत्रम्, शिवमानसपूजा, रामरक्षास्तोत्रम्, नवग्रहस्तोत्रं च छात्राः अपठन् ।

संस्कृतरसिकानां जिज्ञासाम् इच्छां च विज्ञाय संस्थानेन अभ्यासक्रमोऽयम् आरब्धः वर्तते । अभ्यासक्रमेऽस्मिन् २५ छात्राः अध्ययनम् अकुर्वन् । श्रीऋषिः पुरोहितः छात्रेभ्यः मार्गदर्शनम् अददात् ।

### आयोजितानि व्याख्यानानि







संस्कृतरसिकाः संस्कृतसाहित्यस्य परिचयं प्राप्नुयुः इति विचार्य संस्कृतविद्याप्रतिष्ठानं चेरिटेबल ट्रस्ट, एकलव्य-संस्कृत-एकेडेमी, अमदावाद-संस्कृत-एकेडेमी इत्येतेषां संयुक्तोपक्रमेण संस्कृत-साहित्य-रसास्वादव्याख्यानमालायाः आयोजनम् अभवत् । कार्यक्रमेऽस्मिन् फरवरीमासस्य २ दिनाङ्के डॉ. अरुणः वर्मा "अश्वघोष और उनके काव्य" इति विषये, मार्चमासस्य ६ दिनाङ्के डॉ. महाकान्तः जोशी "महाकवि भास रचित कर्णभारम्" इति विषये, मार्चमासस्य २० दिनाङ्के डॉ. हरिनिवासः तिवारी "चाणक्यनीति का परिचय और वर्तमान परिप्रेक्ष्य में उपयोगिता" इति विषये मार्चमासस्य २७ दिनाङ्के डॉ. रवीन्द्रः खाण्डवाला "केनोपनिषद्" इति विषये मनोहरं व्याख्यानं प्रायच्छन् । व्याख्यानानि श्रुत्वा संस्कृतरसिकाः सन्तुष्टाः आसन् ।

## कृपया हसन्तु

**अधिकारी** - (नमनं प्रति) भोः नमन ! किं त्वं 'facebook' एवं च 'whatsapp' इत्येतयोः सहयोगेन धनम् अर्जयितुम् इच्छसि ?

**नमनः** - (उत्साहेन) आम्... आम्... । तन्निमित्तं किं कर्तव्यम् ? इति शीघ्रं कथयतु ।

**अधिकारी** - उभयम् अपि 'delete' इति कृत्वा ध्यानेन कार्यं कुरु ।

★ ★ ★ ★ ★

एकः श्वानः अपरं श्वानम् उद्दिश्य - "मम गृहस्वामी अद्य रात्रौ त्रिवादने एकं चोरम् अगृह्णात् ।"

**द्वितीयः श्वानः** - तदा त्वं कुत्र आसीः ?

**प्रथमः श्वानः** - तदा अहं शयनं कुर्वन् आसम् । भोः, अहं श्वानः न तु मनुष्यः यः रात्रौ अपि whatsapp पश्यन् भवति ।

★ ★ ★ ★ ★

**पिता** - (पुत्रम् उद्दिश्य)- द्वादशकक्ष्यायाः अनन्तरं किं करिष्यसि ?

**पुत्रः** - तात, अहं वैद्यः भूत्वा कोरोना विषाणुं नाशयितुम् औषधं निर्मास्यामि ।

**पिता** - रे हतक !! यस्य कोरोनारोगस्य कारणात् परीक्षां विनैव त्वम् उत्तीर्णः अभवः तस्यैव उपकारं विस्मरिष्यसि किम् ?

## प्रहेलिका

– संस्कृतविकिपिडीयाजालस्थानात्

**सानुजः काननं गत्वा यातुधानान् जघान कः ?**
**मध्ये वर्णत्रयं दत्त्वा रावणः कीदृशो वद ॥**

अनुजेन सह अरण्यं गत्वा राक्षसानां संहारं कः कृतवान् ? तस्य शब्दस्य मध्यभागे अक्षरत्रयं योजयित्वा रावणः कीदृशः इति वदतु ।

**उत्तरम्** – राक्षसोत्तमः

**सीमन्तिनीषु का शान्ता ? राजा कोऽभूत् गुणोत्तमः ?**
**विदुषां का सदा वन्द्या ? अत्रैवोक्तं, न बुध्यते ॥**

स्त्रीषु शान्ता का ? गुणैः उत्तमः राजा कः ? पण्डितानाम् आदरपात्र कः ? एतेषां प्रश्नानाम् उत्तरम् अत्रैव उक्तमस्ति, किन्तु न ज्ञायते ।

**उत्तरम्** – सीता, रामः, विद्या

**जात्याविहङ्गो न परं सपक्षः शब्दायमानो गगने विहारी ।**
**युद्धानुकूली न गजो न चाश्वः विविच्यनाम्ना वद किं तदेतत् ॥**

जात्या अहं विहङ्गो किन्तु मम पक्षौ न स्तः । शब्दं कुर्वन् अहं सर्वदा गगने विहारं करोमि । युद्धाय मम प्रयोगः शक्यः किन्तु गजः नास्मि अश्वः अपि नास्मि तर्हि अहं कः इति भवन्तः वदन्तु ।

**उत्तरम्** – विमानम्

## ज्ञानसरिता

**श्यामः पटेलः**

**बौद्धधर्मः** – बौद्धधर्मस्य संस्थापकः गौतमबुद्धः आसीत्। बाल्यावस्थायां बुद्धस्य नाम सिद्धार्थः आसीत्। सिद्धार्थस्य जन्म ख्रिस्ताब्दात् ५६३ वर्षेभ्यः पूर्वं नेपालस्थितस्य लुम्बिनीस्थाने अभवत्। सिद्धार्थस्य पिता शुद्धोधनः, माता मायादेवी एवञ्च विमाता गौतमी आसीत्। तस्य पत्नी यशोधरा, पुत्रः राहुलः सारथिः चन्ना च आसीत्।

सिद्धार्थः जीवनस्य २५ तमे वर्षे सत्यान्वेषणाय गृहत्यागं कृतवान् । एषा गृहत्यागस्य घटना 'महाभिनिष्क्रमणम्' उच्यते । तदनन्तरम् आलारकलामनामाख्यात् गुरोः सिद्धार्थः साङ्ख्यदर्शनम् अधीतवान् । बोधगयाप्रदेशे फल्गुनद्याः तटे पिप्पलवृक्षस्य अधः तपश्चर्यायाः षष्ठे वर्षे वैशाखमासस्य पूर्णिमायां सिद्धार्थः ज्ञानं प्राप्तवान् । ज्ञानप्राप्तेः कारणात् सिद्धार्थः 'बुद्धः' इति नाम्ना प्रसिद्धः जातः । गौतमबुद्धः स्वस्य प्रथमम् उपदेशं वाराणस्याः समीपे स्थिते सारनाथप्रदेशे दत्तवान् । एषा घटना धर्मचक्रप्रवर्तनम् उच्यते । गौतमबुद्धः प्रथमवारं पालीभाषया उपदिष्टवान् । बुद्धस्य मतानुसारं देवताः अपि कर्मसिद्धान्तान्तर्गताः भवन्ति।



बुद्धस्य शिष्याणां द्वौ प्रकारौ स्तः – भिक्षुकाः उपासकाः च । गौतमबुद्धस्य प्रियश्च आत्मीयश्च शिष्यः आनन्दः आसीत्। बुद्धस्य प्रथममहिलाशिष्या तस्यैव विमाता गौतमी आसीत्। बुद्धस्य महानिर्वाणं ख्रिस्ताब्धात् ४८३ वर्षेभ्यः पूर्वम् उत्तरप्रदेशस्य कुशीनगरे अभवत् । भारते बौद्धधर्मस्य प्रचारं प्रसारं च सम्राट्–अशोकः अकरोत् । बुद्धस्य सर्वाधिकाः मूर्तयः गान्धारशैल्या निर्मिताः सन्ति।

विमाता – stepmother

## शब्दमञ्जूषा

| | |
|---|---|
| **भिषक्** | doctor |
| **निर्वाचनम्** | election |
| **कार्यकारिणी** | executive |
| **निर्यातनम्** | export |
| **सङ्घः** | federation |
| **निगडः** | fetter |
| **पादकन्दुकः** | football |
| **अग्रेसारणम्** | forward |
| **अग्रेसारित** | forwarded |
| **प्रशासनम्** | government |
| **राज्यपालः** | governor |
| **हस्तमुद्रणम्** | hand press |
| **प्रधानाध्यापकः** | headmaster |
| **उच्चन्यायालयः** | high court |
| **अवैतनिकः** | honorary |

## किं भवन्तः जानन्ति ?

**१ ) कुर्मावतारः कस्यां तिथौ अभवत् ?**
(क) चैत्रशुक्लनवम्याम् (ख) वैशाखपूर्णिमायाम्
(ग) फाल्गुनकृष्णतृतीयायाम् (घ) भाद्रपदकृष्णाष्टम्याम्

**२ ) वराहावतारः कस्यां तिथौ जातः आसीत् ?**
(क) फाल्गुनकृष्णपञ्चम्याम् (ख) श्रावणपूर्णिमायाम्
(ग) भाद्रपदशुक्लतृतीयायाम् (घ) कार्तिकामावस्यायाम्

**३ ) नृसिंहावतारः कस्यां तिथौ जातः आसीत् ?**
(क) वैशाखशुक्लचतुर्दश्याम् (ख) आश्विनकृष्णतृतीयायाम्
(ग) फाल्गुनशुक्लदशम्याम् (घ) चैत्रकृष्णाष्टम्याम्

**४ ) वामनावतारः कस्यां तिथौ अभवत् ?**
(क) चैत्रशुक्लनवम्याम् (ख) आश्विनशुक्लषष्ठयाम्
(ग) मार्गशीर्षकृष्णनवम्याम् (घ) भाद्रपदशुक्लद्वादश्याम्

**५ ) भगवतः परशुरामस्य अवतारः कस्यां तिथौ जातः आसीत् ?**
(क) आश्विनशुक्लचतुर्दश्याम् (ख) भाद्रपदाष्टम्याम्
(ग) वैशाखशुक्लतृतीयायाम् (घ) कार्तिकशुक्लषष्ठ्याम्

**६ ) श्रीरामावतारः कस्यां तिथौ जातः आसीत् ?**
(क) चैत्रशुक्लनवम्याम् (ख) भाद्रपदकृष्णाष्टम्याम्
(ग) आश्विनकृष्णतृतीयायाम् (घ) फाल्गुनकृष्णदशम्याम्

उत्तराणि – (१) ख (२) ग (३) क (४) घ (५) ग (६) क

## अस्माकम् आगामिकार्यक्रमाः

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

પ્રસ્તુત કરે છે...

# વાર્તા રે... વાર્તા...

ચાલો !
વાર્તાનાં માધ્યમથી બાળકોને આપણી સંસ્કૃતિનો પરિચય કરાવીએ. બાળકોમાં જીવનમૂલ્યો વિકસાવીએ અને એમને સારા શ્રોતા બનાવીએ.

**તારીખ:** 26-04-2021**થી** 30-04-2021
**સમય: રાત્રે** 8-00 **થી** 9-00

નોંધ:
ધોરણ ૫ થી ૮ના વિદ્યાર્થીઓ આ કાર્યક્રમમાં ભાગ લઈ શકશે.
આ કાર્યક્રમ online રહેશે. જેનું રજીસ્ટ્રેશન શુલ્ક ₹ 100 છે.
કાર્યક્રમના અંતે વિદ્યાર્થીઓને E-Certificate એનાયત કરવામાં આવશે.
વાર્તાકથનનું માધ્યમ ગુજરાતી રહેશે.

વધુ માહિતી અને રજીસ્ટ્રેશન માટે સંપર્ક કરો:
શ્યામ પટેલ: 82384 11655

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

**Admission Open**

# संस्कृतभाषाशिक्षणम्

**First Level**

**Date :** 12/4/21 to 14/7/21
**Day :** Mon-Wed-Fri
**Time :** 6:30 pm to 8:00 pm
**Fees :** 5000/-
**Contact:** Dr. Mihir Upadhyay, Mobile: 98246 16237

**Admission Open**

Value Education Through Sanskrit in

# बालसंस्कृतवर्गः

(Class SKg to 8)

**Date :** 12/6/21 to 26/3/22
**Day :** Every Saturday
**Time :** 6:00 pm to 7:30 pm
**Fees :** 5000/-
**Contact:** Dr. Mihir Upadhyay, Mobile: 98246 16237

संस्कृत-
## साम्प्रतम्

नमस्कारः
यदि भवन्तः "साम्प्रतम्" मासिकीपत्रिकायाः ग्राहकाः भवितुम् इच्छन्ति तर्हि अधोलिखिते सङ्केते धनं प्रेषयन्तु ।

**ग्राहक शुल्कम्**

वार्षिकं रू - 100
द्वैवार्षिकं रू - 175
त्रैवार्षिकं रू - 250
अङ्कमूल्यं रू - 10

**प्रियवाचकाः**
- भवतां समीपे यदि पत्रिकायां प्रकाशनयोग्याः लेखाः, कथाः, हास्यकणिकाः वा सन्ति तर्हि कृपया प्रेषयन्तु ।
- पत्रिकायाः विषये सूचनम् अपि स्वीकार्यम् अस्ति ।

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

**Published, Printed and Edited by Dr. Mihir Upadhyay**
For. Eklavya Sanskrit Academy
Core House, Off CG Road
Ahmedabad 380 006 India
**Fax:** (91) 79 26563681
**Mobile:** (91) 98246 16237
**e-mail:** mihiresa@gmail.com
**web:** www.eklavyasanskritacademy.org

Printed at :- Print Vision Private Limited, Print Vision House, Jay Gujarat Fruit Lane, Ambawadi Market, Ahmedabad, Gujarat 380006